Roll No. ____________

Sub. Code: 119

*Please check that this question paper contains 18 Questions and has 8 Printed pages.*

# D.A.V. INSTITUTIONS, CHHATTISGARH

## SAMPLE QUESTION PAPER 2023-24

**CLASS – X**

**SUBJECT: SANSKRIT**

**Time Allowed: 3 Hours** **Maximum Marks: 80**

**सामान्यनिर्देशाः**

1. **कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 8 पृष्ठानि मुद्रितानि सन्ति ।**
2. **कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।**
3. **अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति ।**

| | | | | |
|---|---|---|---|---|
| 'क' 'भागः | : | अपठितावबोधनम् | : | 10 अङ्काः |
| 'ख' भागः | : | रचनात्मककार्यम् | : | 15 अङ्काः |
| 'ग' भागः | : | अनुप्रयुक्तव्याकरणम् | : | 25 अङ्काः |
| 'घ' भागः | : | पठितावबोधनम् | : | 30 अङ्काः |

4. **प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।**
5. **उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्य लेखनीयः ।**
6. **प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।**
7. **सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।**
8. **प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।**

**क' भागः**

**अपठितावबोधनम्** **(10 अङ्काः)**

**1. अधोलिखित गद्यांश पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **10**

सर्वेषु धनेषु विद्याधनम् एव उत्तमं धनं मन्यते । विद्यया एव जनाः जानन्ति यत् किं कर्तव्यम् अस्ति किं च अकर्तव्यम् । अनया एव ज्ञायते यत् किम् उचितम् अस्ति किं च अनुचितम् । विद्याधनेन एव वयं जानीमः यत् कः सन्मार्गः अस्ति कः च कुमार्गः । विद्यया एव मनुष्यः संसारे सम्मानं प्राप्नोति । विद्याहीनः जनः पशुतुल्यः एव भवति । कर्तव्याकर्तव्ययोः, धर्माधर्मयोः, हानिलाभयोः उचितानुचितयोश्च मध्ये सः अन्तरं न जानाति । विद्यया एव मानवजीवनमूल्यं ज्ञायते, जनानां सुखदुःखयोः भागं विद्यया एव गृह्यते । विद्याहीनस्य जनस्य जीवने कदापि सुखं, सौहार्दं, प्रसन्नता सहभागिताः च न भवन्ति । अतः 'विद्या विहीनः पशुः इति कथयित्वा विद्यायाः गुणगानं शास्त्रैः कृतम् । विद्याधनाय वारं वारं नमः ।

I. **एकपदेन उत्तरत- (केवलं प्रश्नद्वयम् )** **1x2= 2**

(i) कया मनुष्यः सम्मानं प्राप्नोति ?

(ii) मनुष्यः सम्मानं कुत्र प्राप्नोति ?

(iii) कस्मै नमः ?

II. **पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम् )** **2x2= 4**

(i) विद्यया किं ज्ञायते ?

(ii) विद्याधनं कीदृशं धनं मन्यते ?

(iii) किं धनम् उत्तमं मन्यते ?

III. **यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम् )** **1x3= 3**

**(i)** अस्मिन् अनुच्छेदे 'कर्तव्यम्' इति पदस्य किं विपर्ययपदं प्रयुक्तम् ?

(क) अकर्तव्यम् (ख) कुमार्गः

(ग) अनुचितम् (घ) उचितम्

**(ii)** 'जानन्ति' इति क्रियापदस्य अस्मिन् अनुच्छेदे कर्तृपदम् किम्?

(क) जनाः (ख) पशवः

(ग) खगाः (घ) पक्षिणः

**(iii)** 'वयम्' इति कर्तृपदस्य क्रियापदं किम् ?

(क) जानान्ति (ख) जानीमः

(ग) जानामः (घ) ज्ञास्यामः

**(iv)** गद्यांशे अव्ययपदं किम् ?

(क) जानीमः (ख) एव

(ग) अस्ति (घ) कः

**IV.** अस्य गद्यांशस्य उचितं शीर्षकं लिखत। **1x1= 1**

**ख' भागः**

**रचनात्मकं कार्यम्** **(15 अङ्काः)**

**2. भवती सुषमा। भवत्याः अनुजा रमा अस्ति। रमां प्रति वार्षिकपरीक्षायै लिखिते पत्रे शब्दसूची सहायतया रिक्तस्थानानि पूरयतु-** **½x10= 5**

नवदिल्लीतः

दिनाङ्कः.................

प्रिये **(i)**.................रमे**!**

भूरिशाः आशीर्वादाः

अत्र **(ii)** ................. तत्रास्तु तव मासिकी- परीक्षायाः **(iii)** ................. मया दृष्टः। गणितविषये त्वया **(iv)** ................. अङ्काः प्राप्ताः। भवती गणितविषयस्य नित्यम् **(v)** ................. कुर्यात् येन वार्षिकपरीक्षायां गणितविषयेऽपि**(vi)** ................. अङ्कान् प्राप्नुयात् **(vii)** ................. च उत्तमं **(viii)** ................. लभेत। मम **(ix)** ................. अस्ति।

भवत्याः **(x)** ..............

सुषमा

**मञ्जूषा**

| |
|---|
| **न्यूनाः, अग्रजा, भगिनि, परिणामः कक्षायाम्, उत्तमान्, शुभकामना, अभ्यासम्, कुशलम्, स्थानम्** |

**3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत-** **1x5= 5**



**मञ्जूषा**

**पिपासितः, काकः, पाषाणखण्डानि, घटस्य, जलम्, वृक्षाः, उपतिष्ठति, क्षिपति, आगच्छति, गृहम्, पर्वताः, उपरि**

**अथवा**

**अधः प्रदत्तशब्दानां सहायतया 'दीपावल्याः वर्णनम्' इति विषये संस्कृते एकं अनुच्छेदं लिखत-** **1x5= 5**

**मञ्जूषा**

**दीपानाम् अवलिः, रात्रौ अमावस्या, अन्धकारः, श्रीरामः, अयोध्याम्, प्रजाः, प्रसन्नाः आगतः, निशायाः, दूरीकृतः, मिष्टान्नानि, दीपान्, ज्वालयामः, सर्वत्र उल्लासः, हर्षः**

**4. अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत-** **½x10= 5**

यदा श्रीरामः लक्ष्मणश्च देवीं सीताम् **(i)……………** अन्विष्यन् हनुमन्तं मिलित्वा **(ii) ……………** अगच्छताम्। तदा वानरराजः सुग्रीवः तौ कानिचिद् आभूषणानि अदर्शयत्। तानि च आभूषणानि सीतायाः एव सन्ति इति अवलोकयितुं तौ प्रार्थयत्। तदा श्रीरामः **(iii) ……………** तानि आभूषणानि अपश्यत्। ततः सः **(iv) ……………** भूत्वा प्रियम् अनुजं लक्ष्मणमपि **(v) ……………** अयच्छत्। तत्पश्चात् भ्राता लक्ष्मणः ज्येष्ठभ्रातरं **(vi) ……………** अवदत् - "ज्येष्ठभ्रातः ! अहं **(vii) ……………** मस्तकशृंगारं, कङ्कणं, कटिबन्धनं **(viii) ……………** न जानामि परम् नित्यं **(ix) ……….** -करणात् इदं **(x) ………..**अवश्यमेव जानामि यत् इदं खलु मम भ्रातृजायायाः एव सन्ति।

**मञ्जूषा**

**भावविभोरः, नूपुरम्, श्रीरामम्, प्रतिवनम्, ऋष्यमूकपर्वतम्, चरणवन्दना, अश्रूपूर्णनेत्राभ्यां, मङ्गलसूत्रञ्च, भ्रातृजायायाः, अवलोकनार्थम्**

**अथवा**

**रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-** **1x5= 5**

कक्षायां शिक्षक छात्र मध्ये संस्कृतभाषायाः महत्त्वमुपरि भूतं वार्तालापं मञ्जूषायाः सहायता पूरयत -

**छात्रः -** गुरुदेव! भवान् संस्कृतभाषायाः महत्त्वमुपरि किञ्चिद् वदतु।

**शिक्षकः -** पुत्र ! संस्कृतभाषा **(i)…………………?**

**छात्रः -** भवान् इदं कथं कथयति यत् संस्कृतभाषा सर्वप्राचीना सर्वोत्कृष्टा च अस्ति?

**शिक्षकः -** प्रिय वत्स शृणु **(ii) …………………?**

**छात्रः -** इदं तु सत्यमस्ति यत् संस्कृतस्य व्याकरणं तु विशालतमं वर्तते। परम् एषा तु सर्वप्राचीना कथम्?

**शिक्षकः -** एतद् इदं **(iii) …………………?**

**छात्रः -** गुरुदेव विज्ञानक्षेत्रे कथम् इदं ज्ञायते ?

**शिक्षकः -** पुत्रः संसारस्य विज्ञाने ये शब्दाः प्रयुज्यन्ते **(iv) …………………?**

**छात्रः -** गुरुवर अन्तरिक्ष विज्ञाने कथं संस्कृतशब्दाः साहाय्यं कुर्वन्ति?

**शिक्षकः -** **(v) …………………?**

**छात्रः -** भवान् सत्यं वदति अहम् अधुना अस्याः भाषायाः अध्ययनं प्राणपणेन करिष्यामि।

**शिक्षकः -** उत्तमम्। भवान् अग्रे वर्धतु।

**मञ्जूषा**

- **सर्वप्राचीना सर्वोत्कृष्टा च अस्ति।**
- **पुत्र ! अन्तरिक्षे तु गुरुत्वाकर्षणशून्यतया शब्दानां क्रमाः परिवर्तिताः भवन्ति अतः अन्यासां भाषाणां अनेन अर्थाः परिवर्तन्ते परं संस्कृतेन सह एतत् न भवति।**
- **संस्कृतस्य व्याकरणं तु विशालतमं वर्तते।**
- **ते तु पूर्वतः एवं संस्कृतभाषायां सन्ति।**
- **यत् संस्कृतभाषायाः शब्दाः तु सर्वासु भाषासु तत्सम तद्भव वा रूपेण सन्ति।**

**'ग' भागः**

**अनुप्रयुक्तव्याकरणम्** **(25 अङ्काः)**

**5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्टयम्)** **1x4= 4**

(i) सर्वदा **सर्वदाऽस्माकं** सन्निधिं सन्निधिं क्रियात्।

(ii) अतः प्रयतिष्ये चक्षुषोऽस्य पुनः **प्रत्यारोपणाय** इति।

(iii) रे सर्पभक्षक! **नर्तनात् +अन्यत्** किम् अपरं जानासि ?

(iv) कस्मिंश्चित् नगरे **चन्द्रो नाम** भूपतिः प्रतिवसति स्म।

(v) लोके **चक्षुः+दानम्** दुष्करमेव।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**

(i) अश्वत्थामा **द्रोणपुत्रः** आसीत्। **1x4= 4**

(क) द्रोणस्य पुत्रः (ख) द्रोणात् पुत्रः

(ग) द्रोणाय पुत्रः (घ) द्रोणेः पुत्रः

(ii) काकः **सक्रोधं** प्रविश्य कथयति।

(क) क्रोधं सह (ख) क्रोधेन सहितम्

(ग) क्रोधं कृत्वा (घ) क्रोधः काकः च

(iii) एकः वानरः **यथाशक्ति** वृक्षे स्थितान् पक्षिणः तुदति स्म।

(क) शक्तिसहितम् (ख) शक्तिम् अनतिक्रम्य

(ग) शक्तेः योग्यम् (घ) शक्तेः अभावः

(iv) अये ! कथं **श्रीकृष्णार्जुनौ** युधिष्ठिरः च ?

(क) श्रीकृष्णौ अर्जुनौ च (ख) श्रीकृष्णः च अर्जुनः च

(ग) श्रीकृष्णम् अर्जुनं च (घ) श्रीकृष्णः अर्जुनौ च

(v) तस्य वचनम् **अश्रद्धेयम्** अस्ति।

(क) न अश्रद्धेयम् (ख) श्रद्धेयं न

(ग) न श्रद्धेयम् (घ) अनश्रद्धेयम्

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत (केवलं प्रश्नचतुष्टयम्)** **1x4= 4**

(i) वयम् अत्रत्यानाम् **ऐतिहासिक** स्थलानां विषये ज्ञातुम् इच्छामः।

(क) ऐतिहास + ठक् (ख) इतिहास + ठक्

(ग) इतिहास + इक (घ) ऐतिहास + इक

(ii) **धैर्यवान्** लोके परिभवं न प्राप्नोति।

(क) धैर्य+टाप् (ख) धैर्य+मतुप्

(ग) धैर्य+वत् (घ) धैर्य+वान्

(iii) जगत्पतेः एषा सृष्टिः **रमणीया** अस्ति।

(क) रमणीय+टाप् (ख) रमणीय+तल्

(ग) रमणीय+ठक् (घ) रमणीय+ता

(iv) सर्वेषां एव अत्र **महत्वं** विद्यते।

(क) महत्+त्वम् (ख) महत्+त्व

(ग) महत्+ठक्　　　　　　(घ) महत्+मतुप्

(v) पुत्रस्य विद्यादाने किं तपः तेपे इति उक्ति एव तस्य **कृतज्ञता** भवति।

(क) कृतज्ञ+तल्　　　　　　(ख) कृतज्ञ+टाप्

(ग) कृतज्ञ+तल्　　　　　　(घ) कृतज्ञ+ता

**8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत- (केवलं प्रश्नत्रयम्)　1x3= 3**

(i) अध्यापकः - भवान् कुत्र भ्रमति?

(ii) छात्रः - अहं तु क्रीडाक्षेत्रम् **(i)…………….** (गम्)।

(iii) अध्यापकः - त्वया तत्र किमर्थं **(ii) …………….?**

(iv) छात्रः - **(ii) …………….** तत्र क्रीडितुं गच्छामि।

(v) अध्यापकः - भवान् कं खेलं **(iv) …………….** ?

**मञ्जूषा**

| |
|---|
| **क्रीडति, अहम्, गम्यते, गच्छामि** |

**9. कालबोधकशब्दैः अधोलिखित दिनचर्यां पूरयत- (केवलं प्रश्नत्रयम्)　1x3= 3**

**(i)** रमेशः प्रातः ( 5:30)**……………..** वादने उत्तिष्ठति ।

**(ii)** ततः (7:45) **……………..** वादने विद्यालयं गच्छति ।

**(iii)** अपराह्न (2:00) **……………..** वादने विद्यालयात् आगच्छति ।

**(iv)** रात्रौ (10:15) **……………..** वादनं यावत् पठित्वा स्वपिति ।

**10. मञ्जूषायां प्रदत्तै उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नचतुष्टयम्)　1x4= 4**

(i) सः**……………..** वाराणसीं गमिष्यति।

**(ii)** ग्रामात् **……………..**एका नदी प्रवहति ।

**(iii)** त्वं स्वनगरं**……………..**अगच्छः ?

**(iv)** **……………..**अहं पुस्तकं पठामि।

**(v)** सः जनः**……………..** इतस्ततः भ्रमति?

**मञ्जूषा**

| |
|---|
| **सम्प्रति, श्वः, किमर्थम्, कदा, बहिः** |

**11. अधोलिखितवाक्येषु रेखाङ्कित अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत - (केवलं प्रश्नत्रयम्)**

(i) **ताः** अत्र फलं खादतः ।　**1x3= 3**

(क) ते　　　　(ख) त्वम्

(ग) सः　　　　(घ) युवाम्

(ii) किम् अहम् अपि **चलिष्यति** ?

(क) चलिष्यसि　　　　(ख) चलिष्यावः

(ग) चलिष्यामि　　　　(घ) चलानि

(iii) अहं श्वः विद्यालयम् **अगच्छम्** ।

(क) अगच्छन्　　　　(ख) गच्छामि

(ग) गमिष्यामि　　　　(घ) अगच्छाव

(iv) वयं गुरून् **नमामि।**

(क) नमावः (ख) नमाथः

(ग) नमामः (घ) नमन्ति

**'घ' भागः**

**पठितावबोधनम् (30 अङ्काः)**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – 5**

अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः। ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन्। तेषु केचिद् दग्धाः, केचिद् अर्धदग्धाः, केचन च पञ्चत्वं गताः।

**I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½x2= 1**

(i) वह्निना जाज्वल्यमानशरीरः मेषः कुत्र प्रविशति ?

(ii) अश्वाः प्राणात्राणाय कुत्र अधावन् ?

(iii) अश्वशालाम् कः प्रविशति ?

**II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1x2= 2**

(i) यदा मेषः क्षितौ अलुठत् तदा किम् अभवत्?

(ii) मेषः केन अर्धज्वलितकाष्ठेन ताडितः ?

(iii) स मेषः यावत् महानसं प्रविशति तावत् किम् अभवत्?

**III. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1x2= 2**

(i) 'दिने' अस्य पर्यायवाचिपदं गद्यांशात् चिनुत।

(ii) 'तेषु केचिद् दग्धाः।' अत्र क्रियापदं किम् ?

(iii) 'केचन पञ्चत्वं गताः।' अत्र कर्तृपदं किम् ?

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – 5**

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥

**I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½x2= 1**

(i) अस्माकं प्रथमः धर्मः कः ?

(ii) 'आचारः प्रथमः धर्मः' इति केषां वचः ?

(iii) प्राणेभ्योऽपि विशेषतः कः ?

**II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1x2= 2**

(i) विदुषां वचः किम्?

(ii) प्रत्येकं जनः जीवने कं रक्षेत् ?

(iii) कं प्राणेभ्योऽपि विशेषतः रक्षेत्

**III. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1x2= 2**

(i) 'दुराचारम्' इत्यस्य विपर्ययपदं किम् ?

(ii) 'प्रथमः धर्मः' अनयोः पदयोः विशेष्यपदं किम् ?

(iii) 'तस्माद् रक्षेत् सदाचारम्।' अत्र क्रियापदं किम् ?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** 5

**श्रीकृष्णः -** पार्थ! पश्य, पश्य! एतद् विमुच्यते ब्रह्मास्त्रं द्रोणपुत्रेण ! त्रैलोक्यं दहन् इव प्रचण्डज्वालः अग्निः परितः प्रसरति। अर्जुन! अर्जुन! त्वमपि मुञ्च ब्रह्मास्त्रं एतत् निवारयितुम्।

**अर्जुनः -** नमः भगवते ! स्वस्ति आचार्यपुत्राय। स्वस्ति में भ्रातृभ्यः। उत्सृज्यते मया ब्रह्मास्त्रम्। अस्त्रम् अस्त्रेण शाम्यताम्। (ततः प्रविशतः व्यासनारदौ)

**नारदः -** (व्यासं प्रति) पश्यतु भवान्। कोऽयम् अनर्थः क्रियते एताभ्यां वीराभ्याम्। समन्ताद् वर्धमानाः प्रचण्डानलशिखाः आकाशं लिहन्ति इव। गगनात् सहस्रशः उल्काः भूमौ पतन्ति। कम्पते खलु सपर्वत-वन- द्रुमा सकला मही। पवनः स्तब्धः जातः। सहस्रांशुः न भासते।

**I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम् )** **½x2= 1**

(i) उल्काः कुत्र पतन्ति ?

(ii) कः स्तब्धः जातः ?

(iii) अस्त्रम् केन शाम्यताम् ?

**II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम् )** **1x2= 2**

(i) ब्रह्मास्त्रं केन विमुच्यते ?

(ii) द्रोणपुत्रेण किं विमुच्यते ?

(iii) 'नमः भगवते' इति कः वदति ?

**III. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम् )** **1x2= 2**

(i) 'लिहन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'त्यज्यते' इति अर्थे अत्र किं पदं प्रयुक्तम् ?

(iii) 'सहस्रशः' इति पदस्य विशेष्यपदं किम् अस्ति ?

**15. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं पञ्चप्रश्नाः)** **1x5= 5**

(i) अभीष्टवस्तूनि प्राप्य **<u>याचकाः</u>** सन्तुष्टाः आसन्।

(ii) मनुष्यः **<u>कामेन</u>** प्रयुक्तः एव पापस्य आचरणं करोति।

(iii) **<u>आचार्यः</u>** पुत्रं सावधानम् अकरोत्।

(iv) मयूरस्य नृत्यं **<u>प्रकृतेः</u>** आराधना।

(v) **<u>विषादं</u>** त्यक्त्वा उद्यमः क्रियताम्।

(vi) जनकेन सुताय **<u>शैशवे</u>** विद्याधनं दीयते।

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत –** **½x4= 2**

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।
तदेवाहुः महात्मानः समत्वमिति तथ्यतः॥

**अन्वयः** - यथा **(i)**……………… चित्ते तथा यदि **(ii)**……………… भवेत्, **(iii)** ……………… तथ्यतः तदेव **(iv)** ……………… इति आहुः।

**मञ्जूषा**

| वाचि, समत्वम्, महात्मानः, अवक्रता |
|---|

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत –** **½x4= 2**

यः इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।
न कुर्यादहितं कर्म स परेभ्यः कदापि च॥

**भावार्थः** - यः जनः अस्मिन् **(i)................** स्वकल्याणं अनेकानि **(ii) ................** च इच्छेत् सः जनः कदापि अन्य- **(iii) ................** अकल्याणकरं **(iv) ................** न कुर्यात्।

**मञ्जूषा**

| कार्यम्, संसारे, सुखामि, जनेभ्यः |
|---|

**17. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्) 1x4= 4**

(i) स विवेक इति **ईरितः** ।

(क) दृष्टः (ख) कथितः

(ग) श्रुतः (घ) इति

(ii) आपदां **तरणिः** धैर्यम्।

(क) सूर्यः (ख) तरणम्

(ग) नौका (घ) शीघ्रम्

(iii) **पर्जन्यः** द्वादश समाः तद् राष्ट्रं नाभिवर्षति।

(क) मेघः (ख) शक्रः

(ग) इन्द्रः (घ) मासाः

(iv) अभ्यासेन तु **कौन्तेय** वैराग्येण च गृह्यते।

(क) भीमः (ख) अर्जुनः

(ग) नकुलः (घ) श्री कृष्णः

(v) अन्यस्मिन् **अहनि** महानसं प्रविष्टः मेषः सूपकारेण ताडितः।

(क) दिवसे (ख) रात्रौ

(ग) शक्रः (घ) भूमौ

**18. अधोलिखित-कथां रिक्तस्थानानि पूरयित्वा पुनः लिखत – ½x8= 4**

कस्मिंश्चित् नगरे चन्द्रः नामकः एकः **(i)..................** अवसत्। तस्य पुत्राः **(ii) ..................** प्रतिदिनं वानरसमूहं विविधैः **(iii) ..................** पुष्टं कुर्वन्ति स्म। तत्रैव राजगहे **(iv) ..................** मेषयूथमपि आसीत्। तस्य एकः मेषः **(v) ..................** लोलुपतावशात् दिवारात्रं महानसं प्रविश्य तत्र यद् **(vi) ..................** पश्यति तदेव खादति। ततः पाचकाः यत्किञ्चित् काष्ठं मृण्मय-कांस्य **(vii) ..................** वा पश्यन्ति, तेन एव शीघ्रं ताडयन्ति स्म। मेषस्य **(viii) ..................** च कलहं दृष्ट्वा बुद्धिमान् वानरयूथपतिः अचिन्तयत्- "एतेषां कहलः वानराणाम् हिताय नास्ति।

**मञ्जूषा**

| भोज्यपदार्थैः, वस्तु, भूपतिः, जिह्वायाः, वानरक्रीडारताः, सूपकारणाम्, बालवाहनयोग्यम्, ताम्रपात्रम् |
|---|

*************************